# Ramopasana from Shesha Samhita

# શેષસંહિતાન્તર્ગતા રામોપાસના

## Document Information

Text title : rAmopAsanA from sheShasaMhitA

File name : rAmopAsanAsheShasaMhitA.itx

Category : devii

Location : doc_devii

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Latest update : October 7, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 7, 2024

*sanskritdocuments.org*

# શેષસંહિતાન્તર્ગતા રામોપાસના

## રામજયન્તી

શેષઃ -
ત્રેતાયાં ચૈત્રમાસે તુ નવમ્યાં તુ પુનર્વસૌ ।
રામાવતારમકરોલ્લગ્નેઽભિજિતિ યો હરિઃ ॥

નારસિંહવિધાનોક્તમણ્ડપાદીન્ પ્રકલ્પયેત્ ।
બિમ્બયન્ત્રાદિહોમં ચ કુમ્ભં ચ પરિકલ્પયેત્ ॥

સમ્યક્ તત્પ્રતિમાદાનં રામમન્ત્રેણ મન્ત્રવિત્ ।
લક્ષ્મણઃ તદ્દિને લગ્ને અનન્તોઽભૂત્સ્વયં પ્રભુઃ ॥

તતો ભરતશત્રુઘ્નૌ શઙ્ખચક્રે ચ તૌ સ્વયમ્ ।
અભૂતાં તદ્દિને લગ્ને ધર્મસંસ્થાપનાય ચ ॥

તદ્યુગે માસિ કન્યાયા મશ્વિન્યાં શુક્રવાસરે ।
સ્વયં ભૂમિશ્ચ સીતાઽભૂદ્યજ્ઞાધર્માર્થસિદ્ધયે ॥

રઙ્કારં હતસંયુક્તં રામાય નમ ઇત્યપિ ।
જપેન્મન્ત્રમિમં બ્રહ્મન્ સર્વસિદ્ધિપ્રદાયકમ્ ॥

શ્રીં બીજં સમ્યગુદ્ધૃત્ય સીતાયૈ પદમુદ્ધરેત્ ।
જપેત્તદ્વહ્નિજાયાન્તં સર્વૈશ્વર્યપ્રદાયકમ્ ॥

લકારં બિન્દુસંયુક્તં લક્ષ્મણાય નમસ્તથા ।
પ્રીત્યૈ શ્રીરામચન્દ્રસ્ય સર્વસિદ્ધ્યૈ જપેન્મનુમ્ ॥

ઋષિર્બ્રહ્માસ્ય મન્ત્રસ્ય ગાયત્રી છન્દ ઉચ્યતે ।
શ્રીરામો દેવતા પ્રોક્તો રાં બીજં કમલાસન ॥

નં શક્તિર્લં કીલકં સ્વં કવચં રમસ્ત્રકમ્ ।
શ્યામવર્ણમિદં પ્રોક્તં કુર્યાન્મન્ત્રપદૈર્બુધઃ ॥

ષડઙ્ગન્તુ પ્રકુર્વીત સીતારામમનું જપેત્ ।
ધ્યાનં -
વામે ભૂમિસુતા પુરસ્તુ હનુમાન્ પશ્ચાત્સુમિત્રાસુતઃ
શત્રુઘ્નો ભરતશ્ચ પાર્શ્વદલયોરગ્ન્યાદિકોણેષુ ચ ।
સુગ્રીવશ્ચ વિભીષણશ્ચ યુવરાટ્ તારાસુતો જામ્બવાન્
મધ્યે નીલસરોજકોમલરુચિં રામં ભજે શ્યામલમ્ ॥

અષ્ટોત્તરસહસ્રં તુ તજ્જયન્ત્યાં જપેદ્બુધઃ ।
તત્સઙ્ખ્યયાં પ્રત્યહં તુ અષ્ટોત્તરશતં તુ વા ॥

રામમન્ત્રજપધ્યાનપરો યો વત્સસ્ત્રયમ્ ।
તસ્ય સિદ્ધ્યન્તિ ભોગ્યાનિ ધનધાન્યાદિકં સદા ॥

તસ્ય મુક્તિં પ્રદાસ્યામિ બ્રહ્મત્વં ચાથ વાઞ્છિતમ્ ।
રામાનુષ્ટુભમન્ત્રેણ તજ્જયન્ત્યાં તુ તર્પયેત્ ॥

અષ્ટોત્તરશતં વાપિ અષ્ટાવિંશતિમેવ ચા ।
રામગાયત્રિયા ચાર્ઘ્યં દદ્યાત્ ધ્યાયન્વિચક્ષણઃ ॥

શત્રૂન્ રાવણવત્ ધ્યાત્વા સ્વદેહે રામમુત્તમમ્ ।
કુર્યાજ્જપે તથા હોમે સમ કર્મસુ તર્પણે ॥

એવમુક્તપ્રકારેણ યઃ કુર્યાદ્વત્સરત્રયમ્ ।
સ રામવદિહ સ્થિત્વા વિષ્ણુસાયુજ્યમાપ્નુયાત્ ॥

ઇતિ શ્રીપાઞ્ચરાત્રે શેષસંહિતાયાં નવમોઽધ્યાયઃ ।
(૪૧)

## શ્રીરામબીજમ્

શેષઃ -
શ્રીરામૈકાક્ષરં વક્ષ્યે બલરામવિધાનતઃ ।
કૃષ્ણબીજં તતઃ પશ્ચાત્ મોહદેવાદિલક્ષણમ્ ॥

યાન્તવૃત્તસમાયુક્તં બિન્દુનાદવિભૂષિતમ્ ।
કાલાનલસમપ્રખ્યં રામબીજમિતિ સ્મૃતન્ ॥

ઋષિર્બ્રહ્માસ્ય મન્ત્રસ્ય છન્દોનુષ્ટુભમેવ ચ ।

દેવતા રઘુવીરશ્ચ રં બીજં શક્તિશ્રીં તથા ॥

હ્રીં કીલકં ઐં કવચં યમસ્ત્રં રક્તવર્ણકમ્ ।
ષડઙ્ગં ષટ્સ્વરૈર્ન્યસ્ય તદ્બીજેન યથાવિધિ ॥

વ્યાપ્યં તદ્વ્યાપકં ચૈવ કુર્યાત્તન્મન્ત્રવિચ્છુચિઃ ।
આકર્ણમાકૃષ્ટધનુર્ગુણોદ્યદ્બ્રહ્માસ્ત્રલક્ષીકૃતરાક્ષસેન્દ્રમ્ ।
રથાધિરૂઢં રણરઙ્ગધીરં રામં ભજે રક્તસરોરુહાક્ષમ્ ॥

શ્રીરામૈકાક્ષરેણૈવ રુદ્રશ્ચ સતતં પુરા ।
સદાશિવત્વં પ્રાપ્યાથ ગુરુત્વં ચક્રધારણાત્ ॥

ગૌતમાદ્યાસ્તથા દેવાઃ પાર્વતી ચ સરસ્વતી ।
તત્તત્સ્થલમવાપ્યાથ સિદ્ધાનાહુર્વિશારદાઃ ॥

શ્રીરામૈકાક્ષરજપાત્ રુદ્રઃ પૂજ્યોઽભવત્સદા ।
તારકબ્રહ્મમિત્યુક્તં શ્રીરામૈકાક્ષરં પરમ્ ॥

શ્રીસીતેતિ ચ તત્ જ્ઞાત્વા જપેદ્રામમનું સદા ।
ધર્મકામાર્થમોક્ષાર્થી જપેદ્રામં ચતુર્મુખ ॥

જપહોમફલં સર્વં નૃસિંહૈકાક્ષરં યથા ।
શ્રીરામાઙ્ગપ્રતિષ્ઠાદિ રામબીજેન કારયેત્ ॥

(૧૩૬)

## રામમન્ત્રઃ

શેષઃ -
અથ વક્ષ્યેવિધાનેન શ્રીરામમનુમુત્તમમ્ ।
ન્યાસયન્ત્રાદિસહિતં અઙ્ગાઙ્ગાદિસમન્વિતમ્ ॥

અગ્નિબીજં સમુદ્ધૃત્ય રામાય નમ ઇત્યપિ ।
મનુમુદ્ધારયેન્મન્ત્રી તારકં બ્રાહ્મમુત્તમમ્ ॥

ઋષિર્બ્રહ્માસ્ય મન્ત્રસ્ય ગાયત્રી છન્દ ઉચ્યતે ।
શ્રીરામો દેવતા બ્રહ્મન્ રમ્બીજં શક્તિમં તથા ॥

શ્રીં કીલકં હ્રીં કવચં લંઅસ્ત્રં શ્યામવર્ણકમ્ ।
તદ્બીજેન કરન્યાસં તન્મન્ત્રસ્ય પદત્રયૈઃ ॥

ષડઙ્ગં કારયેન્મન્ત્રી ધ્યાનકર્માદિયોગતઃ ।
વ્યાપ્યં તદ્વ્યાપકં ચૈવ તન્મન્ત્રાણૈવ કારયેત્ ॥

પરાત્પરં વિભું દવં વૈશેષપરમાત્મકમ્ ।
ચાપબાણધરં ધીરં રામં સીતાપતિં ભજે ॥

ચાતુરઙ્ગવિધાનેન તર્પયેચ્ચન્દનામ્ભસા ।
શ્વેતપદ્મૈર્બિલ્વપત્રૈઃ કરવીરૈસ્તુ ચામ્પકૈઃ ॥

નન્દ્યાવર્તૈરશોકૈશ્ચ પૂજયેદ્રામમાદરાત્ ।
રાજ્યાર્થી જુહુયાત્પદ્મૈઃ કન્યાર્થી લાજકૈર્યજેત્ ॥

યજેત્કુન્દૈઃ ખાદિરૈસ્તુ નિમ્બકાષ્ઠૈસ્તુ સર્ષપૈઃ ।
વશ્યાકૃષ્યાદિમોહે ચ ત્રિમધું ગુગ્ગુલં સ્થિતમ્ ॥

તિલપાયસસંયુક્તં યજેન્મણ્ડલભેદતઃ ।
તત્તદ્દ્રવ્યસ્ય હવનાત્ તત્તત્ફલમવાપ્નુયાત્ ॥

(૨૧૨)

## યન્ત્રઃ

જપકર્માદિ સિદ્ધ્યર્થં વક્ષ્યે તદ્યન્ત્રમુત્તમમ્ ।
ષટ્કોણં પૂર્વમાલિખ્ય તન્મધ્યે સાધ્યસંયુતમ્ ॥

તદ્બીજન્તુ શ્રિયા બ્રહ્મન્ કર્મનામ લિખેત્તથા ।
તત્કોણેષુ લિખેન્મન્ત્રી શ્રીરામસ્ય ષડક્ષરમ્ ॥

સીતારામં ચ તત્સન્ધૌ તદ્બીજેનૈવ વેષ્ટયેત્ ।
બહિરષ્ટદલં લિખ્ય તદ્બીજં તુ નમોન્તકમ્ ॥

રામચન્દ્રાય વિલિખેત્ તદ્દલેષુ સુમન્ત્રવિત્ ।
તત્સન્ધૌ રં લમુદ્ધૃત્ય લક્ષ્મણાય નમો લિખેત્ ॥

ક્રોડબીજેન સંવેષ્ટ્ય તદ્બહિર્દ્વાદશં દલમ્ ।
લિખેદ્દલેષુ ૐ શ્રીં ચ જાનકીવલ્લભાય ચ ॥

સ્વાહા લિખેચ્ચ તત્સન્ધૌ વાસુદેવમનું લિખેત્ ।
તદ્બહિષ્ષોડશદલં તદ્દલેષુ લિખેત્ક્રમાત્ ॥

રાં નમો ભગવતે રામભદ્રાય હું ફટ્ સ્વાહા ।

તત્સન્ધૌ તુ સ્વરાન્ લિખ્ય લક્ષ્મીબીજેન વેષ્ટયેત્ ॥

ચતુર્વિંશદ્દલં લિખ્ય તદ્બહિર્મન્ત્રવિત્તમઃ ।
તદ્દલેષુ ક્રમાદ્બ્રહ્મન્ ગાયત્રં રામકં લિખેત્ ॥

તત્સન્ધૌ સૌરગાયત્રીં લિખેલ્લક્ષ્મ્યા ચ વેષ્ટયેત્ ।
દ્વાત્રિંશદ્દલમાલિખ્ય તદ્દલેષુ લિખેત્ક્રમાત્ ॥

શ્રીરામાનુષ્ટુભં લિખ્ય તત્સન્ધૌ સૌરમાલિખેત્ ।
એતદ્યન્ત્રસમં નાસ્તિ સત્યમેતચ્ચતુર્મુખ ॥

ઇતિ શ્રીપાઞ્ચરાત્રે શ્રીશેષસંહિતાયાં ત્રિપઞ્ચાશોઽધ્યાયઃ ।
(૨૧૩)

## રામાઙ્ગમન્ત્રઃ ૧

શેષઃ -
વક્ષ્યે રામાઙ્ગમન્ત્રાણિ રામમન્ત્રાર્થસિદ્ધયે ।
રહસ્યં સર્વશાસ્ત્રાણાં દુર્લભં સામ્યમુત્તમ્ ॥

સ્વાહાન્તં તુ શ્રિયાદૌ તુ સીતાયૈ મનુરુત્તમઃ ।
શ્રીરામસ્યાર્ધાઙ્ગમન્ત્રસ્સર્વસિદ્ધિપ્રદાયકઃ ॥

લં લક્ષ્મણાયેતિ તથા મનું તદ્વજ્જપેદ્બુધઃ ।
વરાહૈકાક્ષરં તદ્વત્ નારસિંહં સુદર્શનમ્ ॥

હયગ્રીવં મૂલમન્ત્રં મન્ત્રરત્નં જપેત્સદા ।
શ્રીરામમન્ત્રસિદ્ધ્યર્થં જપેદઙ્ગાનિ તત્તથા ॥

ઇતિ શ્રીપાઞ્ચરાત્રે શ્રીશેષસંહિતાયાં ચતુઃપઞ્ચાશોઽધ્યાયઃ ।
(૨૧૫)

## રામાઙ્ગમન્ત્રઃ ૨

શેષઃ -
વક્ષ્યે શ્રીરામમન્ત્રસ્ય અઙ્ગાઙ્ગાનિ તથૈવચ ।
તત્તન્મન્ત્રૈઃ તદઙ્ગાનિ જપેત્પૂર્વોક્તસઙ્ખ્યયા ॥

ભં ભરતાયેતિ તથા મનુરિષ્ટાર્થદાયકઃ ।

શં શત્રુઘ્નાયેતિ મનુઃ સર્વાભીષ્ટપ્રદાયકઃ ॥

મં મર્કટાયેતિ મનુઃ તથા કામ્યાર્થદાયકઃ ।
પક્ષિરાજ જપેન્મન્ત્રી તદઙ્ગાનિ ચ તજ્જપેત્ ॥

ઇતિ શ્રીપાઞ્ચરાત્રે શેષસંહિતાયાં પઞ્ચપઞ્ચાશોઽધ્યાયઃ ।
(૨૧૫)

## હનુમદ્બીજમ્

શેષઃ -
સમ્યગ્વક્ષ્યે વિધાનેન હનુમદ્બીજમુત્તમમ્ ।
અન્નાધિપં કાર્તવીર્યં હયગ્રીવં નૃકેસરિમ્ ॥

ભાન્તં યાન્તસમાયુક્તં હાલાહલસમપ્રભમ્ ।
મર્કટેશસ્ય બીજં સ્યાત્ સર્વસંહારકારકમ્ ॥

ઋષી રુદ્રોઽસ્ય મન્ત્રસ્ય જગતી છન્દ ઉચ્યતે ।
દેવતા મર્કટેશશ્ચ સ્યં બીજં શક્તિઃ યં તથા ॥

લં કીલકં યં કવચં રં અસ્ત્રં રક્તવર્ણકમ્ ।
ષડઙ્ગં ષટ્સ્વરૈર્ન્યસ્ય વ્યાપ્યાદીન્ પૂર્વવત્તથા ॥

દંષ્ટ્રાકરાલમત્યુગ્રં પિઙ્ગાક્ષં મુષ્ટિધારિણમ્ ।
ઉદારાઙ્ગં ત્રિનેત્રં તં વન્દે લઙ્કાભયઙ્કરમ્ ॥

ચાતુરઙ્ગફલં સમ્યક્ વામનૈકાક્ષરાદિવત્ ।
(૧૪૭)

Being a compilation, the page numbers
of Sheshsamhita book for each section
are given in parenthesis.

Encoded and proofread by Mrityunjay Pandey

*Ramopasana from Shesha Samhita*

pdf was typeset on October 7, 2024

Please send corrections to *sanskrit@cheerful.com*